## हुश्नुवोः सार्वधातुके। (८७/२३८७)

[1]हु इत्येतस्याङ्गस्य श्नुप्रत्ययान्तस्य[2] अनेकाचः असंयोगपूर्वस्य अजादौ सार्वधातुके परतो यणादेशो भवति। जुह्वति। जुह्वतु। [3]जुह्वत्। सुन्वन्ति। सुन्वन्तु। असुन्वन्। हुश्नुवोः इति किम्? योयुवति। रोरुवति। इदमेव हुश्नुग्रहणं ज्ञापकं भाषायामपि यङ्लुगस्ति इति। छन्दसि[4] 'छन्दस्युभयथा' (६.४.८६/३५४८) इत्यार्धधातुकत्वादेव[5] यणादेशस्याप्रसङ्गः। न च यङ्लुगन्तादन्यत् प्रत्युदाहरणम् उवर्णान्तम् अनेकाच् असंयोगपूर्वं सार्वधातुके विद्यते। सार्वधातुके इति किम्? जुहुवतुः। जुहुवुः। असंयोगपूर्वस्य इत्येव, आप्नुवन्ति। राध्नुवन्ति॥

## भुवो वुग् लुङ्लिटोः। (८८/२१७४)

भुवो [6]वुगागमो भवति लुङि लिटि चाजादौ [7]परतः। अभूवन्। अभूवम्। लिट् – [8]बभूव, बभूवतुः, बभूवुः॥

## ऊदुपधाया गोहः। (८९/२३६४)

गोहोऽङ्गस्य उपधाया ऊकारादेशो भवति अजादौ प्रत्यये परतः। [9]निगूहति। निगूहकः। [10]साधुनिगूही। [11]निगूहंनिगूहम्। निगूहन्ति। [12]गूहो वर्तते। उपधायाः इति किम्? अलः अन्त्यस्य मा भूत्। गोहः इति विकृतग्रहणं [13]विषयार्थम् (म.भा. ३.२११)। [14]यत्रास्यैतद्रूपं तत्रैव यथा स्यात्। इह मा भूत्, निजुगुहतुः। निजुगुहुः[15]। [16]अयादेशप्रतिषेधार्थं च केचिदिच्छन्ति। [17]निगूह्य गतः इत्यूत्वस्यासिद्धत्वाद् ल्यपि लघुपूर्वादिति[18]णेरयादेशः स्यात्[19]। [20]व्याश्रयत्वादेवा[21]सिद्धत्वमत्र नास्ति, णावूत्वम्, ण्यन्तस्य च ल्यप्ययादेश इति। अचि इत्येव, निगोढा। निगोढुम्॥

## दोषो णौ। (९०/२६०४)

दोषः उपधाया ऊकारः आदेशो भवति णौ परतः। दूषयति, दूषयतः, दूषयन्ति। विकृतग्रहणं [22]प्रक्रमाभेदार्थम्। पूर्वत्र हि गोहः इत्युक्तम्। णौ इति किम्? दोषो वर्तते॥

## वा चित्तविरागे। (९१/२६०७)

[23]चित्तविकारार्थे दोष उपधाया वा ऊकारादेशो भवति णौ परतः। चित्तं दूषयति, चित्तं दोषयति। [24]प्रज्ञां दूषयति, प्रज्ञां दोषयति॥

---

1. यण् इति वर्तते इत्यधिकम् ह. 2. च इत्यधिकम् क, अङ्गस्य इत्यधिकम् ह. 3. अजुह्वन् अ.ब.क. 4. हि इत्यधिकम् ब.क.ड. 5. एव यणादेशस्य नास्ति क. 6. अङ्गस्य इत्यधिकम् क. 7. प्रत्यये इत्यधिकम् फ. 8. बभूव नास्ति फ.इ. 9. निगूहयति क. 10. साधुनिगूहिनी ह. 11. निगूढम् क, गूहनम् ह. 12. निगूहो वर्तते क.फ.ह.इ. 13. विषयनियमार्थम् ह.ड.इ. 14. घञन्तस्य ब. 15. इति इत्यधिकम् फ.ह. 16. अयादेशो भवति प्रतिषेधार्थं च क. 17. उपगुह्य गतः ह. 18. इत्ययमादेशः क. 19. इति इत्याधिकम् फ. ह. 20. तच्च इत्यधिकम् ब, तस्य इत्यधिकम् ह. 21. असिद्धमत्वमत्र नास्ति क. 22. क्रमाभेदार्थम् ह. 23. चित्तविरागे अर्थे ब.क.इ, विरागार्थे ड, विचित्तविरागेऽर्थे ह. 24. प्रज्ञातम् दूषयति, प्रज्ञातम् दोषयति ह.